श्री वाराही देवी स्तोत्रम्

नमोऽस्तु देवी वाराहि जयैकारस्वरूपिणि |
जपित्वा भूमिरूपेण नमो भगवतः प्रिये ||1||

जय क्रोडास्तु वाराहि देवित्वां च नमाम्यहम् |
जय वाराहि विश्वेशि मुख्य वाराहिते नमः ||2||

मुख्यवाराहि वंदेत्वां अंधे अंधिनिते नमः |
सर्वदुष्ट प्रदुष्टानां वाक् स्तंभनकरी नमः ||3||

नमस्तंभिनि स्तंभेत्वां जृंभेजृंभिणिते नमः |
रुंधे रुंधिनि वंदेत्वां नमो देवीतुमोहिनी ||4||

स्वभक्तानांहि सर्वेषां सर्वकाम प्रदे नमः |
बाह्वास्तंभकरी वंदे चित्तस्तंभिनिते नमः ||5||

चक्षुस्तंभिनि त्वां मुख्य स्तंभिनीते नमो नमः |
जगत् स्तंभिनि वंदेत्वां जिह्वास्तंभनकारिणि ||6||

स्तंभनं कुरु शत्रूणां कुरुमे शत्रुनाशनम् |
शीघ्रं वश्यंच कुरुते योग्ने वाचात्मके नमः ||7||

टचतुष्टय रूपेत्वां शरणं सर्वदाभजे |
होमात्मकेफट् रूपेण जयाद्यानकेशिवे ||8||

देहिमे सकलान् कामान् वाराही जगदीश्वरी |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ||9||

इदमाद्यानना स्तोत्रं सर्वपापविनाशनम् |
पठेद्यः सर्वदा भक्त्या पातकैर्मुच्यते तथा ||10||

लभंते शत्रवोनाशं दुःखरोगापमृत्यवः |
महदायुष्यमाप्नोति अलक्ष्मीर्नाशमाप्नुयात् ||11||

नभयं विद्यते क्वापि सर्वदा विजयोभवेत्
आभीष्टार्धान् लभेत् सर्वान् शरीरी नात्रसंवयः ||12||

||इति श्री वाराही स्तोत्रम् संपूर्णं ||